# ૐ નમઃ શિવાય ॥
## ધ્યાનમ્

વન્દે શમ્ભુમુમાપતિં સુરગુરું વન્દે જગત્કારણં
વન્દે પન્નગભૂષણં મૃગધરં વન્દે પશૂનાં પતિમ્ ।
વન્દે સૂર્યશશાંકવહ્નિનયનં વન્દે મુકુન્દપ્રિયં
વન્દે ભક્તજનાશ્રયં ચ વરદં વન્દે શિવં શંકરમ્ ॥ ૧ ॥

વન્દે પંચમુખાંબુજં વિનયનં વંદે લલાટે ક્ષણં
વન્દે વ્યોમગતં જટાસુમુકુટં ચંદ્રાર્ધગંગાધરમ્ ।
વન્દે ભસ્મકૃત ત્રિપુંડ્રજટિલં વંદેઽષ્ટમૂર્ત્યાત્મકં
વન્દે ભક્તજનાશ્રયં ચ વરદં વંદે શિવં શંકરમ્ ॥ ૨ ॥

ધ્યાયેન્નિત્યં મહેશં રજતગિરિનિભં ચારુચંદ્રાવતંસં
રત્નાકલ્પોજ્જ્વલાંગં પરશુમૃગવરા ભીતિહસ્તંપ્રસન્નમ્ ।
પદ્મમાસીનં સમંતાત્ સ્તુતમમરગણૈર વ્યાઘ્રાકૃત્તિં વાસનં
વિશ્વાદ્યં વિશ્વવંદ્યં નિખિલભયકરં પંચવક્ત્રં ત્રિનેત્રમ્ ॥ ૩ ॥

## શ્રી દ્વાદશ જ્યોતિર્લિંગ

સૌરાષ્ટ્રે સોમનાથં ચ શ્રીશૈલે મલ્લિકાર્જુનમ્ ।
ઉજ્જયિન્યાં મહાકાલમ્ ઓમકારમમલેશ્વરમ્ ॥ ૧ ॥

પરલ્યાં વૈદ્યનાથં ચ ડાકિન્યાં ભીમશંકરમ્ ।
સેતુબંધે તુ રામેશં નાગેશં દારુકાવને ॥ ૨ ॥

વારણસ્યાં તું વિશ્વેશં ત્રયમ્બકં ગૌતમીતટે ।
હિમાલયે તુ કેદારં ધુશ્મેશં ચ શિવાલયે ॥ ૩ ॥

એતાનિ જ્યોતિર્લિંગાનિ સાયં પ્રાતઃ પઠેન્નરઃ ।
સપ્તજન્મકૃતં પાપં સ્મરણેન વિનશ્યતિ ॥ ૪ ॥